

# गणपति अथर्व षीर्षम् (गणपत्यथर्वषीर्षोपनिषत्)-॥ गणपत्यथर्वशीर्षोपनिषत्

https://www.chalisa.online

|| गणपति अथर्व षीर्षम् (गणपत्यथर्वषीर्षोपनिषत्) ||
॥ गणपत्यथर्वशीर्षोपनिषत् (श्री गणेषाथर्वषीर्षम्) ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ं
सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति
नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्ताऽसि ।
त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि
। त्वं साक्षादात्माऽसि नित्यम् ॥ 1 ॥
ऋतं वच्मि । सत्यं वच्मि ॥ 2 ॥
अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव
शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात्
। अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समंतात् ॥ 3 ॥
त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि
। त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ 4 ॥
सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं
त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो
नभः । त्वं चत्वारि वाक्पदानि ॥ 5 ॥
त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः
। त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति
नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ 6 ॥
गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनंतरम् । अनुस्वारः परतरः । अर्धेंदुलसितम्
। तारेण ऋद्धम् । ऎतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम्
। अनुस्वारश्चांत्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । सग्ंहिता संधिः
। सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्रीच्छंदः । श्री महागणपतिर्देवता
। ॐ गं गणपतये नमः ॥ 7 ॥
एकदंताय विद्महे वक्रतुंडाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ 8 ॥
एकदंतं चतुर्हस्तं पाशमंकुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्
। रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगंधानुलिप्तांगं रक्तपुष्पैः
सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ
प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ 9 ॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने
शिवसुताय श्रीवरदमूर्तये
नमः ॥ 10 ॥
एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते ।
स सर्वतः सुखमेधते । स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं
नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो
भवति । धर्मार्थकाममोक्षं च विंदति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि
मोहाद् दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते । तं तमनेन
साधयेत् ॥ 11 ॥
अनेन गणपतिमभिषिंचति । स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति स विद्यावान्
भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यान्न बिभेति कदाचनेति ॥ 12
यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति
। स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य
समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ 13 ॥
अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां
प्रतिमासन्निधौ वा जप्त्वा सिद्धमंत्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात्
प्रमुच्यते । महापापात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स सर्वविद्भवति
स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥ 14 ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ं
सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति
नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः ॥

|| https://www.chalisa.online ||